ISSN : 2583-2271
Vol. - I, No. 1: 2021

# पण्डितराजजगन्नाथकृतकाव्यविभागस्यौचित्यम्

**डा. चन्द्रकला आर्. कोण्डी**

**प्रबन्धसारः**

*कविः लौकिकं वस्तु अलौकिकतया रसात्मकवाक्यैः वर्णयति। तदेव काव्यं भवति। काव्यस्य च प्राचीनैः नवीनैश्च आलङ्कारिकैः विविधा भेदाः परिकल्पिताः। तत्र भामहादिभिः बाह्योपाधिं पुरस्कृत्य काव्यविभागो दर्शितः। दण्डिना भाषाधारेण संस्कृत-प्राकृत-अपभ्रंश-मिश्ररूपेण चातुर्विध्यं काव्यस्य विहितम्। महिमभट्टः रसवत्त्वेन काव्यस्य एकविधत्वमेव अङ्गीकरोति। विश्वनाथस्तु काव्यस्य द्वैविध्यं दृढं प्रतिपादयति। ध्वनिकारस्तु प्रतीयमानार्थस्य काव्यविभाजकोपाधित्वमङ्गीकृत्य ध्वनिकाव्यं, गुणीभूतव्यङ्ग्यमिति काव्यस्य द्विधा भेदं दर्शितवान्। जगन्नाथस्तु उत्तमोत्तर-उत्तम-मध्यम-अधमभेदेन काव्यस्य चातुर्विध्यं स्वीकृतम्। एवं भेदस्वीकारे किमौचित्यमिति अस्मिन् प्रबन्धे आलोच्यते। एतादृशभेदचतुष्टयस्वीकारे जगन्नाथस्य केचन विशेषा अवलोक्यन्ते। तथाहि मध्यमत्वेन परिगणितस्य गुणीभूतव्यङ्ग्यकाव्यस्योत्तमकाव्यत्वापादनम्। स एव पण्डितराजस्य विशेष इति केचनाभिप्रयन्ति। गुणीभूतव्यङ्ग्यस्य जागरूकत्वा-जागरूकत्वाभ्यां पृथक्त्वाविष्करणम्, चमत्कारतारतम्यं पुरस्कृत्य शब्दार्थचित्रयोः समुचितस्य प्रत्येकं स्थानस्य परिकल्पनम्, आन्तरालिकव्यङ्ग्यस्य ध्वनित्वसमर्थनं चेति। मम्मटादिभिः कृतस्य काव्यविभागस्याधारः व्यङ्ग्यार्थः, जगन्नाथस्य तु चमत्कार इति विभागस्याधार एव भिद्यते। अतः तत्तन्मतानुसारं द्वयोरप्युपादेयता वर्तत एवेति शोधबन्धस्यास्य अभिप्रायः।*

काव्यविभागविषये प्राचीनानां नवीनानाञ्च दृष्टिः परस्परमत्यन्तमेव विलक्षणा वर्तते। भामहादिभिः बाह्योपाधिं पुरस्कृत्य काव्यविभागः कृतः। छन्दोनियम-तदभावयोराधारेण गद्यं पद्यमिति द्वैविध्यम्,[1] भाषाधारेण संस्कृत-प्राकृत-अपभ्रंश**भेदेन** त्रैविध्यम्[2], प्रतिपाद्य-विषयाधारेण वृत्तदेवादि-चरितशंसि-उत्पाद्यवस्तु-कलाश्रय-शास्त्राश्रयम् इति चातुर्विध्यम्[3], प्रकारान्तरेण सर्गबन्ध-अभिनेयार्थ-आख्यायिका-कथा-अनिबद्धम् इति पञ्चविधत्वं[4] च काव्यस्यवप्रतिपादितं भामहाचार्येण। छन्दोनियम-तदभावयोः आधारेण गद्य-पद्य-मिश्रभेदेन त्रैविध्यम्[5], भाषाऽऽधारेण संस्कृत-प्राकृत-अपभ्रंश-मिश्ररूपेण चातुर्विध्यं[6] दण्डिना प्रतिपादितम्। काव्यस्य रसवत्त्वेन एकविधत्वमङ्गीकुर्वन् महिमभट्टः "काव्यविशेष इत्यत्र काव्यस्य विशिष्टत्वमनुपपन्नं काव्यमात्रस्य ध्वनिपदव्यपदेश-विषयत्वेन इष्टत्वात्तस्य च रसात्मकत्वोपगमात्"[7] इत्यवदत्। काव्यं द्विविधमेवेति विश्वनाथकविराजस्य दृढं प्रतिपादनम्। यत्र भामहादिभिः बाह्योपाधिं पुरस्कृत्य काव्यविभागः प्रादर्शि, तत्रैव ध्वनिकारेण काव्यान्तस्तत्त्वस्य प्रतीयमानार्थस्य स्थितेः काव्यविभाजकोपाधित्वमुररीकृतम्। तत्र व्यङ्ग्यार्थस्य वाच्यापेक्षया प्राधान्ये ध्वनिकाव्यम्, व्यङ्ग्यसम्बन्धेन वाच्यचारुत्वप्रकर्षशालि काव्यं गुणीभूतव्यङ्ग्यमिति रीत्या काव्यस्य भेदद्वयम्। रसभावादिव्यङ्ग्यविशेषविवक्षाविरहे सति यत्रालङ्कारोपनिबन्धः तच्चित्रकाव्यम्। तच्च चित्रं शब्दचित्रम्, वाच्यचित्रञ्चेति द्विविधम्। मम्मटाचार्येणापि व्यङ्ग्यार्थस्य प्राधान्याप्राधान्या-स्फुटत्वाधारेण उत्तम-मध्यम-अधमभेदेन काव्यस्य त्रैविध्यं प्रतिपादितम्। सामान्यतः सर्वैरपि आलङ्कारिकैः काव्यस्य त्रैविध्यमेव आद्रियते। एवं त्रिवर्गभाञ्जि काव्यानि जगन्नाथेन उत्तमोत्तम-उत्तम-मध्यम-अधमभेदेन चतुर्वर्गताम् उपयापितानि। प्राचीननवीनालङ्कारिककृतकाव्यविभाग-विलक्षणे, अंशतः नवीनालङ्कारिकसम्बद्धे, अंशतश्च स्वीयालोचना-परिणामात्मके च जगन्नाथकृतकाव्य-विभागे केचन विशेषा एवमुल्लिखितुं शक्यन्ते -

१. मध्यमत्वेन परिगणितस्य गुणीभूत-व्यङ्ग्यकाव्यस्योत्तमकाव्यत्वापादनम्। स एव पण्डितराजस्य विशेष इति केचनाभिप्रयन्ति।

२. गुणीभूतव्यङ्ग्यस्य जागरूकत्वा-जागरूकत्वाभ्यां पृथक्त्वाविष्करणम्।

३. चमत्कारतारतम्यं पुरस्कृत्य शब्दार्थ- चित्रयोः समुचितस्य प्रत्येकं स्थानस्य परिकल्पनम्।

४. आन्तरालिकव्यङ्ग्यस्य ध्वनित्वसमर्थनम्।

जगन्नाथस्य काव्यविभाजकोपाधिः कः? यदि व्यङ्ग्य एव तथा स्वीक्रियते तर्हि शब्दार्थचित्रयोः मध्यमत्वाधमत्वाभ्यां क्रमेण प्रत्येकशः काव्यविभागः किमिति कर्तव्यतामापतित इति सन्देहो जायते, त्रैविध्येनैव च काव्यविभागः परिसमाप्तो भवति। अतः व्यङ्ग्यं तस्य काव्यविभाजकोपाधिर्न। किं तर्हि? चमत्कार एव। तदीयकाव्यलक्षण-परिष्कारेषु चमत्कारार्थबोधक-पदानामवलोकनेन एतत् स्पष्टं ज्ञायते। चमत्कारेषु व्यङ्ग्यचमत्कारः, वाच्यचमत्कारः, शब्दचमत्कार इति त्रैविध्यं परिकल्प्य, प्रधानतया-अप्रधानतयेति व्यङ्ग्यचमत्कारेऽपि द्वैविध्यमङ्गीकृत्य, व्यङ्ग्यस्य प्रधानतया चमत्कारकत्वे उत्तमोत्तमम्, तस्यैव प्राधान्येन चमत्कारकत्वे उत्तमम्, व्यङ्ग्यचमत्कारोपस्कृतस्य वाच्यचमत्कारस्य प्राधान्ये मध्यमम्, वाच्यचमत्कारोपस्कृतस्य शब्दचमत्कारस्य प्राधान्ये तु अधममिति काव्यस्य चतुर्धा विभागः चमत्कारं पुरस्कृत्यैव प्रवृत्तः। 'चमत्कारत्ववत्त्वमेव काव्यलक्षणम्', 'काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव' इत्यादिवाक्यैः चमत्कार एव तस्य काव्यविभाजकोपाधिरिति निश्चीयते।

---

[1] काव्यं गद्यं पद्यं च तद्द्विधा। काव्यालङ्कारे प्रथमाध्यायः

[2] संस्कृतं प्राकृतञ्चान्यदपभ्रंश इति त्रिधा-काव्यालङ्कार प्रथमाध्यायः

[3] वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः ॥ काव्यालङ्कार प्रथमाध्यायः

[4] सर्गबन्धोऽभिनेयार्थः तथैवाख्यायिकाकथे।
अनिबद्धश्च काव्यादि तत्पुनः पञ्चधोच्यते ॥ काव्यालङ्कार प्रथमाध्यायः

[5] गद्यं पद्यञ्च मिश्रञ्च तत्त्रिधेति व्यवस्थितम्-दण्डी, काव्यालङ्कार।

[6] तदेतद्वाङ्मयं भूयस्संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम् ॥ दण्डी, काव्यालङ्कार)

[7] व्यक्तिविवेक।

व्यङ्ग्यस्य काव्यविभाजकोपाधित्वेन स्वीकारे, ध्वनि-गुणीभूतव्यङ्ग्ययोरुद्भूततया व्यङ्ग्यस्य सद्भावात् व्यङ्ग्यं पुरस्कृत्य काव्यव्यवहार उचित एव। परन्तु स्फुटप्रतीयमानार्थरहितमिति चित्रकाव्यस्य स्वरूपं स्पष्टीकुर्वता मम्मटाचार्येण चित्रकाव्ये रसादिव्यङ्ग्ये कवितात्पर्यविरहः स्फुटमुक्त एव। एवं तात्पर्यविषयीभूतो व्यङ्ग्यस्तत्र विद्यमानोऽप्यविद्यमानकल्प एवेति तादृशव्यङ्ग्यार्थपुरस्सरं तत्र काव्यत्वव्यवहारो न युज्यते, किन्तु वाच्यपुरःसरमेव। अत एव पण्डितराजः व्यङ्ग्यमात्रस्य काव्यविभाजको-पाधित्वमपहाय चमत्कारं काव्यविभाजको-पाधित्वेन स्वीकरोति। व्यङ्ग्यार्थरूपेण उत्तमोत्तम-उत्तमकाव्ययोः, वाच्यरूपेण मध्यमकाव्ये, शब्दरूपेण चाधमकाव्ये चमत्कारो वर्तत एव इति केचनाभिप्रयन्ति। किन्तु मम्मटाचार्यकृत-काव्यविभागेषु तेषां काव्यलक्षणमन्वेत्येव। व्यङ्ग्यार्थस्यापि अवस्थितिः तन्मतानुसारं तत्र कामपि सन्दिग्धतां नावहति। अतः तेषां काव्यविभागः व्यङ्ग्यार्थावस्थित्याधारेण, जगन्नाथस्य तु चमत्काराधारेणेत्येतावानेव भेदोऽस्माभिः स्वीकरणीयः।

अन्यैरालङ्कारिकैर्ध्वनिकाव्यत्वेन अर्थात् उत्तमत्वेनाङ्गीकृतं काव्यम् अनेन उत्तमोत्तमत्वेन स्वीकृतम्। ध्वनिकारोक्तध्वनिलक्षणं तत्रान्वेति-

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥" इति। मम्मटाचार्यैः अपि - 'इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथित' इति।

उभयत्रापि जगन्नाथोक्तं वाच्य-वाचकयोर्गुणी-भूतत्वम्, व्यङ्ग्यस्य कमनीय-तामूलकं प्राधान्यञ्च समानम्। व्यङ्ग्यं प्रधानं वा भवतु अप्रधानं वा, तस्य चमत्कारहेतुत्वे उत्तमत्वमेवाङ्गीकर्तुम् उचितम्, न तु मध्यमत्वम्। अस्य उत्तमत्वाङ्गीकारे यत्र व्यङ्ग्यम् अप्रधानं, तथापि चमत्कारहेतुस्तत्र मध्यमत्वम् अङ्गीकरणीयं भवति। तन्नेष्यत इति हेतोः व्यङ्ग्यस्य चमत्कारित्वं प्राधान्याप्राधान्याभ्यां द्विधा विभज्य प्राधान्य-चमत्कारहेतुत्वयोः सत्वे उत्तमोत्तमकाव्यत्वम्, अप्राधान्य-चमत्कार-हेतुत्वयोस्सत्व उत्तमकाव्यत्वम् इति व्यवस्थितं जगन्नाथेन।

व्यङ्ग्यस्य कथञ्चिदपि चमत्कारहेतुत्वे तस्य मध्यमत्वं न सङ्गच्छत इत्यंशाधारेण जगन्नाथः मम्मटोक्तगुणीभूतव्यङ्ग्यकाव्यम् उत्तमत्वेन परिगणयति। मम्मटमते गुणीभूतव्यङ्ग्ये व्यङ्ग्यस्य सर्वथा अचमत्कारित्वम्। किन्तु तादृशमपि काव्यं दृष्टिगोचरं भवति यत्र अप्रधानो भूत्वापि व्यङ्ग्यश्चमत्कारी भवेत्। तादृशकाव्यस्य कथं व्यवहार इति मम्मटमतेन स्पष्टता न जायते। अत एव जगन्नाथः व्यङ्ग्यस्य प्राधान्येन चमत्कारकत्वरूपोत्तमोत्तमकाव्यस्यानन्तरं तादृश-काव्यस्य स्थानं कल्पितवान्। तत्रापि व्यङ्ग्यस्य चमत्कारित्वान्न तदुत्तमोत्तमकाव्याद् बहुदूरे तिष्ठति, किन्तु समीप एव। परन्तु अप्राधान्येन चमत्कारक इत्येव हेतोः प्राधान्येन व्यङ्ग्य-चमत्कारयुक्त उत्तमोत्तमे नान्तर्भवति, तावदेव।

तर्हि जगन्नाथस्याभिप्राये मध्यमकाव्यं कीदृश्म्? मम्मटाचार्यैरधमकाव्यलक्षण- निरूपणावसरे 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृत'मित्युक्तम्। अव्यङ्ग्यमित्यस्य च स्फुटप्रतीयमानार्थरहितत्वम्ः अभिहितम्। किन्तु शब्दचित्रापेक्षया वाच्यचित्रे चमत्कारस्य गणनीयमाधिक्यं पश्यन् जगन्नाथः तच्चित्रकाव्यात् पृथक्कृत्य मध्यमकाव्यप्रकारे स्थापितवान्।

न तादृशं काव्यं दृष्टिगोचरं भवति यत्र लेशतोऽपि व्यङ्ग्यार्थो नास्ति। अतः व्यङ्ग्यार्थस्य सम्पर्कः लेशतया वा सर्वत्रापि भवत्येव। व्यङ्ग्यार्थस्य सम्पर्काद्वाच्यः अपि उत्कृष्टतां प्राप्नोति। यत्र व्यङ्ग्यचमत्कारा-समानाधिकरणो वाच्यचमत्कारस्तत्र मध्यमकाव्यं भवति। अर्थाद्यत्र व्यङ्ग्यचमत्कारः लेशतः सन्नपि वाच्यचमत्कारस्य प्रभावात् न प्रतीयते तत्र मध्यमकाव्यम्। मम्मटाचार्यैः अधमकाव्यान्तर्भावितवाच्यचित्रस्यैव मध्यमत्वं दत्तं जगन्नाथेन, शब्दचित्रान्नितान्तं वाच्यचित्रस्य वैषम्यात् तयोरेकपङ्क्तिनिवेशस्यानौचित्यात्।

उत्तम-मध्यमकाव्ययोः समस्तान्यलङ्का-रप्रधानकाव्यानि प्रविष्टानि वर्तन्ते। उत्तमकाव्ये गुणीभूतस्य व्यङ्ग्यस्य जागरूकता चमत्कारकारणत्वञ्च, मध्यम- काव्ये त्वजागरूकता चमत्कारकारणा भावश्चेति तयोर्विशेषः।

यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं काव्यम्। यत्र अर्थचमत्कृतेः अपेक्षया शब्दचमत्कृतिरेव प्रधाना, सा च शब्दचमत्कृतिः अर्थचमत्कृत्युपस्कृता भवति तत्राधमकाव्यत्वम्। अर्थालङ्कारापेक्षया शब्दालङ्काराणामेवात्र चमत्कार इति तात्पर्यम्।

यथा उत्तमोत्तमम्, उत्तममिति च काव्यविभागः कृतोऽस्ति जगन्नाथेन, तथैव अधम-अधमाधम इति विभज्य काव्यस्य पञ्चप्रकारा वक्तव्या आसन्। यतो हि एकाक्षरीवृत्तम्, अर्धावृत्तियमकम्, पद्मबन्धादयः, कुत्र निवेशनीया इति जगन्नाथः किमपि नोक्तवान्। तत्रापि महाकवयः प्रयत्नवन्तो वर्तन्ते। कुतो नोक्तमेतेषामधमा-धमत्वमित्युच्यते चेदिदमेव उत्तरम्-काव्यलक्षणेऽस्माभिः रमणीयार्थप्रतिपादक- शब्दस्य काव्यत्वमुक्तम्। यदि काव्यप्रकारेषु (अधमत्वेनाधमाधमत्वेन वा भवतु) तत्परिगण्यते तर्हि रमणीयार्थप्रतिपादकत्वं तेषां शब्दानां भवेत्। किन्तु न भवतीति सर्वेषामनुभवगोचरमेव। अतः एतादृशकाव्यानां रमणीयार्थस्य परिधेर्बाह्यत्वात् न तत् काव्यप्रकारेषु परिगणितम्।

अत जगन्नाथस्य काव्यविभागस्य आधारमेवं वक्तुं शक्नुमः-

(१) प्रधानतया व्यङ्ग्यस्य चमत्कार-कारणत्वे उत्तमोत्तमकाव्यम्। अत्र वाच्यः व्यङ्ग्योपस्कारकः।

(२) गौणरूपेणैव वर्तमानस्य किन्तु जागरूकस्य व्यङ्ग्यस्य चमत्कारकारणत्व उत्तमकाव्यम्।

अत्र व्यङ्ग्यः वाच्योपस्कारकत्वेन गौणोऽपि, दुर्दैववशाद्दास्यकार्ये नियुक्ता राज्ञीव जागरूको भवति। व्यङ्ग्यस्य वाच्योपस्कारकत्वाद्वाच्य-चमत्कारस्तु प्रधानतया भवत्येव। तेन सह गुणीभूतव्यङ्ग्योऽपि चमत्कारं जनयति। लक्षणेऽपि जगन्नाथः गुणीभूतव्यङ्ग्यस्य चमत्कारकारणत्वमेव प्राधान्येन लक्षितवान्। अपि च मध्यमकाव्यलक्षणकरणावसरे वाच्यचमत्कारस्य व्यङ्ग्यचमत्कारासमानाधिकरणत्वम् उक्तम्। तेन उत्तमकाव्ये तयोः सामानाधिकरण्यमिष्यत एव। अतः सामान्यरूपेण वर्तमानस्य वाच्यचमत्कार- स्य, विशेषेण वर्तमानस्य गुणीभूतव्यङ्ग्यस्य च चमत्कारजनकत्वस्य तुल्यतैव जगन्नाथेन विवक्षितं स्यात्। गुणीभूत-व्यङ्ग्यस्याष्टप्रकारेषु तुल्यप्राधान्यरूप-प्रकारेण समानतां भजते जगन्नाथोक्तमुत्तमं काव्यम्।

(३) व्यङ्ग्यस्य गुणीभूतस्य अजागरूक-त्वात् व्यङ्ग्यापेक्षया वाच्यस्यैवाधिकचम-त्कारकारणत्वे मध्यमकाव्यम्।

(४) अर्थापेक्षया, किन्तु अर्थेनोपस्कृतः शब्दचमत्कारः काव्ये वर्तते तर्हि अधमकाव्यम्।

गुणीभूतव्यङ्ग्यकाव्यस्योत्तमत्वेन परिगणनस्य औचित्यम्

उपर्युक्तरीत्या मम्मटादिभिः त्रिधा विभक्तस्य काव्यस्य चतुर्धा विभागः जगन्नाथकृतः सङ्गच्छते न वेति परीक्षितव्यम्। अतः

तादृशविभागे यो विशेषः वर्तते सोऽस्माभिर्विमृष्टव्यः। स च विशेषः, मम्मटादिभिः गुणीभूतव्यङ्ग्ये निविष्टस्य काव्यप्रकारस्य जगन्नाथेन उत्तमकाव्ये निवेश एव। अतोऽस्माभिस्तस्यौचित्यं तावत् चर्चितव्यम्।

मम्मटादयः गुणीभूतव्यङ्ग्ये सर्वत्रापि वाच्यापेक्षया अन्य-गुणीभूतरसभावादीन् हीनचमत्कारयुक्तान् मन्यन्ते, यस्य प्रभावः नागेशभट्टस्योपरि स्पष्टतया पतितः। मम्मटादिभिर्गुणीभूतव्यङ्ग्यत्वेन परिगणितम् इदं पद्यं पण्डितराजेनोत्तम-काव्यत्वेन स्वीकृतम्-

“अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥”

अत्र वाच्यापेक्षया व्यज्यमानः शृङ्गारो न चमत्कारकः। शोकोत्कर्षत्वाद् व्यङ्ग्या(शृङ्गारा)-पेक्षया वाच्य एव चमत्कारातिशय इति मम्मटादयः। परन्तु पण्डितराजोऽत्र वाच्यापेक्षया शृङ्गारस्यैव अधिकचमत्कारतां वदति। अस्मिन् विषये मथुरानाथशास्त्रिभिः सरला-टीकायामेवम् उक्तमस्ति-

“अयं भावः - यद्यत्र ‘व्यङ्ग्यमप्रधानमेव सत्’ इत्यवधारणं न दीयेत तर्हि ‘व्यङ्ग्यमप्रधानं सत् चमत्कारकम्’ इत्यर्थो भवेत्, ततश्च ‘अयं स रसनोत्कर्षी’ इत्याद्यपराङ्गोदाहरणेषु करुणापेक्षया अप्रधानं शृङ्गारश्चमत्कारकारणम् अस्तीति ध्वनित्वस्थाने अस्याप्युत्तमकाव्यत्वं प्रसज्येत, एवकारनिवेशे तु यद्व्यङ्ग्यमप्रधानमेव सदित्युक्त्या करुणा-पेक्षया गुणत्वेऽपि वाच्यार्थापेक्षया शृङ्गाररसप्राधान्यम् अस्तीति ध्वनिकाव्यत्वमस्य व्याहतम्।”

यत्र गुणीभूतव्यङ्ग्यस्य सर्वेषु प्रकारेषु मम्मटादयः गुणीभूतव्यङ्ग्यत्वमेवाङ्गीकुर्वन्ति, तत्रापि जगन्नाथः चमत्कारस्य निम्नोन्नतस्थितिं परिलक्ष्य, चमत्काराधारेणैव विभागं कुरुते। अस्य प्रेरणादायिनी भवति आनन्दवर्धनाचार्यस्येयं कारिका-

“प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्।
धत्ते रसदितात्पर्यपर्यालोचनया पुनः॥”[8]

वस्तुतः एतादृशगुणीभूतप्रकारा कुत्र निवेशनीया इति निर्णयस्तु काठिन्यं भजते। अतस्तत्र रसादितात्पर्यपर्यालोचनयैव निर्णयः स्वीकरणीयः। उदाहरणार्थम्, काव्यप्रकाशस्य प्रथमोल्लासे मध्यमकाव्यस्य उदाहरणत्वेन मम्मटाचार्यैरिदमुदाहरणं दत्तम्-

“ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथ-करम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥”[9]

वञ्जुललतानिकुञ्जे दत्तसङ्केताऽपि नागतेति व्यङ्ग्यस्यापेक्षया, प्रियस्य हस्ते वञ्जुललतामञ्जरीं दृष्ट्वा तस्याः मुखच्छाया मलिनाऽभूदिति वाच्यमेव सुन्दरम्, इति मम्मटाचार्यः। किन्तु काव्यप्रकाशस्य टीकाकारेष्वेवासहमतिः वर्ततेऽस्मिन् विषये। काव्यप्रकाशस्य ‘आदर्श’टीकाकारः महेश्वराचार्यः तद्विरचितादर्शटीकायाम्-

“इदमत्रावधेयम् - गुणीभूतव्यङ्ग्यत्वम् अत्र वाच्यमुखमालिन्यापेक्षया न्यूनचमत्का-रिणं ‘दत्तसङ्केता नागते’त्यर्थम् अभिप्रेत्यैव उक्तम्, मुखमालिन्येन व्यज्यमानस्य विषादस्य तु पर्यवसाने प्रधानतयैवावस्थानाद् अभिप्राये असंलक्ष्यक्रमध्वनित्वम् एवास्य युक्तमिति” इति।

राघवविरहज्वालेत्यादौ पद्येऽपि ‘हनूमता जानकीकुशलावेदनेन राघवः शिशिरीकृतः’ इत्याकारकव्यङ्ग्यार्थः कपिकोपरूपवाच्यस्य उपपादकत्वा(पोषकत्वा)दप्रधान एव, पद्ये अस्मिन् व्यङ्ग्यार्थानवगमेन वाच्यचमत्कारस्य असिद्धेः, तथापि दुर्दैववशात् दासीकार्यं कुर्वती महाराज्ञीव व्यङ्ग्यार्थेऽपि कमनीयता वर्तत एव। अर्थात् गुणीभूतोऽपि व्यङ्ग्यार्थः जागर्ति। काव्यस्य उत्तमोत्तम-उत्तम-प्रकारयोर्द्वयोरपि व्यङ्ग्यार्थः जागरूक एव तिष्ठति। किन्त्वेकत्र प्राधान्येन अन्यत्र चाप्राधान्येनेत्येव विशेषः-

‘अनयोर्भेदयोरनपह्नवनीयचमत्कारोऽपि
प्राधान्याप्राधान्याभ्यामस्ति कश्चित्सहृदयवेद्यो विशेषः’।

एवम् उत्तमोत्तमकाव्ये ध्वनिकृतश्चमत्कारः, उत्तममध्यमकाव्ययोः सर्वोऽप्यर्थालङ्कारकृतः चमत्कारः, अधमकाव्ये च शब्दकृतश्चमत्कार इति जगन्नाथस्य काव्यविभागस्याधारः।

अत्र अनौचित्यं किमपि न पश्यामः। किन्तु मम्मटादिभिः कृतस्य काव्यविभागस्याधारः व्यङ्ग्यार्थः, जगन्नाथस्य तु चमत्कार इति विभागस्याधार एव भिद्यते। अतः तत्तन्मतानुसारं द्वयोरप्युपादेयता वर्तत एव।

## व्याख्याकारः


- काव्यालङ्कारः, व्याख्या. रामदेव शुक्ल, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००३
- व्यक्तिविवेकः, व्याख्या. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, १९९७
- ध्वन्यालोकः, व्याख्या. आचार्य शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन, २००१
- काव्यप्रकाशः, व्याख्या. ड. सत्यव्रतसिंहः, चौखम्बा विद्याभवन, वाराणसी, २००३
- साहित्यदर्पणः, व्याख्या. आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८६
- रसगङ्गाधरः, व्याख्या. आचार्य बदरीनाथ झा, चौखम्बा सुरभारती प्रकाशन।


[8] ध्वन्यालोकः-तृतीयोद्योतः-कारिका-४०

[9] काव्यप्रकाशः-प्रथमोल्लासः-मध्यमकाव्यस्योदाहरणपद्यम्